This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५४

०/-3

अथआत्मबोधप्रकरणप्रारंभः

ACC. NO: ~~1135~~ M1096.
Title :- आत्मबोध
Author :- शंकराचार्य
Subject :- वेदांत
पत्रे :- ९

Checked 2012

K.K.S.U. LIBRARY RAMTEK 441 106 M1096 Dist. Nagpur

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ.बो. ।।श्रीगणेशाय नमः।। श्रीरामचंद्राय नमः।। शमदमखपूजितपादं शांतपथमनसोप्यगो
१ चराकारं।। विकसितजलरुहनेत्रं सीताछायांकमाश्रये रामं।।१।। इह खलु भगवान् शं
कराचार्य उत्तमाधिकारिणां वेदांतप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मंद
बुद्धीनां अनुग्रहार्थं सर्ववेदांतसिद्धांतसंग्रहमात्मबोधाख्यं प्रकरणं निदर्शयिषुः

।। तपोभिः क्षीणपापानां शांतानां वीतरागिणां।। मुमुक्षूणामपेक्ष्यो
यमात्मबोधो विधीयते ।।१।। ।।

प्रतिजानीते।। तपोभिरिति।। कृच्छ्रचांद्रायणनित्यनैमित्तिकानुष्ठानरूपैस्तपोभिः
क्षीणानि पापानि रागाद्यंतःकरणदोषास्तेषां।। नित्यनैमित्तिकैरेव कुर्वाणो दुरित
क्षयमिति वचनात्।। अत एव शांतानां अक्षोभिताशयानां वीतरागाणामिहामुत्रा १
र्थभोगेच्छारहितानां मुमुक्षूणां संसारग्रंथिभेदनकृतप्रयत्नानां।। यथोक्तसाधनसंप
न्नानां अयमात्मबोधो विधीयते।। विधिमुखेनावश्यकतया प्रतिपाद्यत इत्यर्थः।।१।। ।।

ननु तपोमंत्रकर्मयोगाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोध एव किमिति प्राधान्ये
नोच्यत इत्यत आह।। बोध इति।। तपोमंत्रकर्मयोगादि साधनानि परंपरया क्रमेण
ज्ञानद्वारा मोक्षं साधयंति।। ज्ञानं तु स्वजन्ममात्रादेवाज्ञानं निर्विशेषं नाशयित्वा मुमु

।। बोधोन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनं।।
पाकस्य वन्हिवज्ज्ञानं विना मोक्षो न सिध्यति ।।२।।

क्षुं स्वाराज्येऽभिषेचयति।। अतोन्यसाधनेभ्यो ज्ञानस्य प्राधान्यमुक्तं।। तदेव
दृष्टांतेन दृढयति।। पाकस्येति।। यथा लोके पचनक्रियायां काष्ठजलभांडादिसा
धनेषु सत्स्वपि वन्हिं विना पाको न सिध्यतीत्यर्थः।।२।। ।।

ननु ज्ञानं विना मोक्षो न सिध्यती



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० ननु कर्मणां विचित्रशक्तिमत्वात्कर्मैव किं न अज्ञानं नाशयिष्यति॥किमात्मज्ञानेनेत्याशं बो०
क्य कर्मज्ञानयोर्विरोधाभावान्नैवमित्याह॥अविरोधितयेति॥ कर्मणो विद्याविरोधा
२ भावाद् ज्ञानं नाशयितुं नोत्सहते॥विद्यातु प्रकाशरूपत्वात्॥अंधतमसं तेजः पुंजइव नाश
यितुं नोत्सहते॥विद्यातु प्रकाशरूपत्वात्॥अंधतमसं तेजः पुंजइव नाशयितुं समर्थेत्यर्थः॥३

॥अविरोधितया कर्मनाविद्यां विनिवर्तयेत्॥विद्याविद्यां निहंत्येव
तेजस्तिमिरसंघवत्॥३॥ परिछिन्न इवाज्ञानात्तन्नाशे सति केवलः॥
स्वयं प्रकाशते ह्यात्मा मेघापायेंशुमानिव॥४॥ ॥ ॥

ननु प्रतिशरीरमात्मा परिछिन्न एवोपलभ्यते कथमस्य कैवल्यमित्यत आह॥परिछिन्न इति॥
परिपूर्णस्याप्यात्मनः अज्ञानपरिकल्पितोपाधिय च शरीराध्यासहेतुत्वपरिछिन्नत्व २
मविवेकहेतुकमेव न तु तत्वदृष्ट्या॥अतो अविवेकहानात् ज्ञाने सति तदात्मा केवल एव प्रकाश
ते मेघावरणाभावे भानुवदित्यर्थः॥४॥ वे ॥

नन्वात्मनोऽद्वैतसिद्धिरयुक्ता द्वितिज्ञानेन द्वैतसिद्धेरित्यत आह॥अज्ञानेति॥अज्ञानका
र्यभूतैरहमादिभिः कलुषीकृतं कर्तृत्वभोक्तृत्वाद्यभिमानिनं जीवं ज्ञानं कर्तृ चिरकाल
भ्यासात् अज्ञानहननद्वारा तत्कार्यांतःकरणादिकं निःशेषं नाशयित्वा स्वयमेवनश्य

अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्धि निर्मलम्॥
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्॥५॥

ति अज्ञानकार्यत्वाद्वृत्तेः॥नन्वप्रतिबिंबितज्ञानमात्माभासत्वात्॥आत्मन्येवैकीभ
वति तदानीं अद्वय एवात्मा प्रकाशते॥यथा कतकरेणुराविलं जलं निर्मलं कृत्वा स्वय
मेवनश्यति तद्वदित्यर्थः॥५॥ ॥

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० अपरोक्षतयानुभूयमानस्य संसारस्य कथमसत्वं नासत्वं प्रत्यक्षविरुद्धमित्याशंक्य स्वप्नदृ बो०
ष्टांतेनास्य मिथ्यात्वं साधयति ॥ संसार इति ॥ रागद्वेषादिभिः संकुलायमानः संसारः ॥
३ स्वकाले स्वस्य कारणभूताज्ञाने स्थिते सति तावन्मिथ्याभूतोपि संसारः सन्निवाभाति ॥

संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः ॥ ॥
स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत् ॥ ६ ॥

प्रबोधे सति वाक्यश्रवणादात्मज्ञानोत्पत्तौ सत्यां असन्नेव भाति ॥ तत्र दृष्टांतः ॥ स्वप्नतुल्य
इति ॥ स्वप्नो हि यावन्निद्रानुभूयते तावन्मिथ्याभूतोपि सत्य इवाभाति ॥ प्रबोधे निद्रानाशे ३
मिथ्या भवेदित्यर्थः ॥ ६ ॥ ॥

जगन्मिथ्यात्वमेव दृष्टांतांतरेण द्रढयति ॥ तावदिति ॥ यथा यावन्नीलपृष्ठत्रिकोणादि
विशेषज्ञानं नोत्पद्यते तावद्रजतज्ञानं सत्यमेवानुभूयते ॥ तथा सर्वाधिष्ठानभूतं सच्चिदा
नंदाद्वयं ब्रह्म यावन्न ज्ञायते साक्षान्नानुभूयते तावज्जगदाकारेण परिणतः संसारः स
त्य इव भ्रांत्या दृश्यत इत्यर्थः ॥ ७ ॥ सर्वं दृश्यप्रपंचजातं ब्रह्मण्येव मायाकल्पितमिति प्र

तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ॥ यावन्न ज्ञायते ब्रह्म सर्वा
धिष्ठानमद्वयम् ॥ ७ ॥ सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पि
ताः ॥ व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥ ८ ॥ ॥

तिपादयति ॥ सच्चिदिति ॥ सत्यज्ञानानंदात्मनि नित्ये सर्वानुस्यूते विष्णौ व्यापके ब्रह्मणि स
र्वे देवतिर्यङ्नरस्थावरजंगमादयो विविधा अपि व्यक्तयः सर्वोपादानभूते परमेश्वरे हे
म्नि कटकमुकुटादय इव कल्पिता एव ब्रह्मणो भिन्ना इत्यर्थः ॥ ८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ०

उक्तमर्थमाकाश दृष्टांतेन दृढयति॥ यथेति॥ हृषीकेशो नाम मनः प्रभृति सर्वेंद्रिय प्रवर्त्तकः बो०
नियामको वा विभुः सर्वगतः परमेश्वरः स्वमायया परिकल्पित नानाविधोपाधिषु प्रतिबिं
४ बितः सन् नानेव भाति॥ तन्नाशेसति तिन्नत्वमेकत्वं तानेन तेषां मायापरिकल्पितदेहाद्युपाधीनां

यथाकाशो हृषीकेशो नानोपाधिगतो विभुः॥
तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत्॥ ९॥

नाशेसति केवल एकवद्भाति॥ यथा एक एवाकाशो मठघटाद्युपाधिषु एक एव नानावि ४
धो भाति॥ उपाधिलयादेकवद्भाति तद्वदित्यर्थः॥ ९॥ ॥

ननु सर्वदेहेषु जन्तजात्यादिभिरनुविद्धस्य कथं नित्य मुक्तता उच्यते तत्राह॥ नानोपाधीति
पूर्वोक्तनानोपाधिवशाद् देवात्मनि जाति वर्णाश्रमादय आरोपिता मायाकल्पिताः ननु
स्वतः यथा स्वभाव माधुर्ये जलं कटु तिक्त कषाय मधुराम्ल रूपी तादिद्रव्योपेतं सत्तद्रूपं

नानोपाधिवशादेव जाति वर्णाश्रमादयः॥ आत्मन्यारोपितास्तोये रस
वर्णादि भेदवत्॥ १०॥ पंचीकृत महाभूत संभवं कर्म संचितं॥ शरीरं सु
खदुःखानां भोगायतन मुच्यते॥ ११॥ ॥ ॥

भवति न तु स्वरूपेण तद्वदित्यर्थः॥ १०॥ आत्मनोऽविद्यापरिकल्पितोपाधित्रयमध्ये स्थू
लोपाधिमाह॥ पंचीति॥ पंचानां भूतानां प्रत्येकं द्विधा विभज्य तत्रैकमेकमर्द्धं चतुर्द्धा वि
भज्य स्वांशं परित्यज्य तेषु योजनं पंचीकरणं॥ एवं पंचीकृतेभ्यः स्थूल पृथिव्यादि महाभू
तेभ्यः संभवो यस्य तत्तं भूतं प्रारब्ध कर्मभिः संचितं स्थूल शरीरं सुखदुःखानामायतनं
भोगस्थानं प्रसंगात्तन्न इति॥ ११॥ ॥

(S)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ॰ सूक्ष्मोपाधिमाह॥ पंचेति॥ पंच प्राणा एकस्यैव महाप्राणस्य प्राणादयो वृत्तयः॥ ज्ञानेंद्रि
यकर्मेंद्रियभेदेन इंद्रियाणि दश मनः शब्देन संकल्पविकल्पांतःकरणवृत्तिः बुद्धिर्निश्चया
५ त्मिका एतैः संयुक्तं अपंचीकृततत्सूक्ष्मभूतोत्थं जातं सूक्ष्मांगं लिंगशरीरं सुखदुःखभोगसा
धनमित्यर्थः॥१२॥ तृतीयं कारणोपाधिमाह॥ अनादीति॥ सदसद्भ्यामनिर्वाच्या अवि

पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं॥ अपंचीकृतभूतोत्थं
सूक्ष्मांगं भोगसाधनं॥१२॥ अनाद्यविद्यानिर्वाच्या कारणो
पाधिरुच्यते॥ उपाधित्रितयादन्यमात्मानमवधारयेत्॥१३॥ ॥

द्या अनादिभूता कारणोपाधिरुच्यते॥ सा च समष्टिव्यष्टिभेदेन स्थूलसूक्ष्मप्रपंचयोः का
रणभूतत्वात्कारणोपाधिरुच्यते॥ उपाधित्रयकथने प्रयोजनमाह॥ उपाधित्रितयादन्य ५
मिति तत्साक्षिणमात्मानं अवधारयेत् जानीयादित्यर्थः॥१३॥ ॥ ॥

ननु अन्नमयादिषु कोशेषु व्याप्य तत्तन्मयतया स्थितस्य कुतो नित्यत्वमुच्यते इत्याशं
क्याह॥ पंचकोशेति॥ अन्नमय प्राणमय मनोमय विज्ञानमय आनंदमयाः पंचको
शाः॥ आदिशब्देन अशनापिपासादीनां ग्रहणं॥ एतैर्योगेन मिथ्यातादात्म्येन तत्तन्मय

॥ पंचकोशादियोगेन तत्तन्मय इव स्थितः॥
॥ शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा॥१४

इव स्थितः आत्मा शुद्धः॥ ननु तेषु वस्तुतो रंजितः वेदोपि स वा एष पुरुषोऽन्नरसमय इत्या
दिभिः सूक्ष्मवस्तुदर्शनार्थमेवोपाधिस्थं ब्रह्म लक्षयति न तु तत्त्वदृष्ट्या यथा निर्मलस्फ
टिको नीलपीतवस्त्रादियोगेन तत्तन्मय इवाभाति वस्तुतो नास्ति तेन रंजनात् तद्वदित्यर्थः॥१४॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० असंगात्मस्वरूपज्ञानविवेचनप्रकारमाह ॥ वपुरिति ॥ पंचकोशोत्मावदात्मनिस्थितं वपुः बो०
६ स्थूलशरीरं तुषादिभिर्युक्तं तंडुलमिव युक्तं युक्त्यावघाततः अवहननात् ॥ शुद्धमात्मानं तं
तंडुलमिव विविच्यात् विवेकेन जानीयात् ॥ कथं अयं स्थूलदेहो नात्मा भूतकार्यत्वात् घ

वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यवघाततः ॥
आत्मानमंतरं शुद्धं विविच्यात्तंडुलं यथा ॥१५॥

टवत् ॥ सूक्ष्मदेहोपि नात्मा देहत्वात् स्थूलदेहवदित्यनुमानादिना तेभ्यः कोशेभ्योभि ६
न्नमात्मानं विविच्याज्जानीयादित्यर्थः ॥१५॥

नन्वात्मा सर्वगतस्तर्हि किं सर्वत्र सर्वैर्न दृश्यते इत्यत्राह ॥ सदेति ॥ आत्मा सर्वगतोपि सर्वत्र
व्याप्य स्थितोपि जडैर्बहिः प्रसक्तैर्न प्रकाश्यते ॥ रागादिभिरविद्धायां बुद्धावेवावभासनेन स
र्वत्र यथा प्रतिबिंबः स्वच्छेष्वेव दर्पणादिषु दृश्यते नान्यत्र तद्वदित्यर्थः ॥१६॥ देहेस्थितस्या

सदा सर्वगतोप्यात्मा न सर्वत्रावभासते ॥ बुद्धावेवावभासेत
स्वच्छेषु प्रतिबिंबवत् ॥१६॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो वि
लक्षणं ॥ तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥१७॥ ॥

प्यात्मनो औदासीन्यं राजदृष्टांतेनाह ॥ देहेंद्रियेति ॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो जडप
रिणामिदृश्येभ्यो विलक्षणं शुद्धात्मानं तद्वृत्तीनां साक्षितया स्थितं ॥ यथा राजा स्वनगरे स्थि
तेषु मंत्रिषु वर्तमानेषु स्वयं साक्षितया तान् पश्यन् तिष्ठति तद्वदेव जानीयादित्यर्थः ॥१७॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ०

ननु आत्मनोऽविकारित्वमयुक्तं सर्वदा व्यापारवान् दृश्यते तत्राह ॥ व्यावृत्तेष्विति ॥ इंद्रियादि ष्वत्स्वविषयेषु व्यावृत्तेषु सत्सु आत्मा व्यापारीवाविवेकिनां गुरुशास्त्राद्युपदेशरहितानां
७ दृश्यते ॥ ननु तत्त्वदर्शनं यथा मेघसंघेषु वायुवशात् द्रवत्सु चंद्रोपि धावतीव लौकिके दृश्यते न तु चंद्रमा धावति तथात्मापीत्यर्थः ॥१८॥ ननु देहेंद्रियमनोबुद्धयोपि सचेतना दृश्यंते किं

व्यावृत्तेष्विंद्रियेष्वात्मा व्यापारीवाविवेकिनां ॥ दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥१८॥ आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधियः ॥ स्वकीयार्थेषु वर्त्तंते सूर्यालोके यथा जनाः ॥१९॥

मात्मानमाश्रित्य प्रवर्त्तंते तत्राह ॥ आत्मचैतन्यमिति ॥ नित्यज्ञानस्वरूपमात्मचैतन्यमा
श्रित्य देहेंद्रियमनोबुध्यादयः स्वकीयार्थेषु व्यवहरंति ॥ यथा जनाः प्राणिनः सूर्यप्रका ७
शमाश्रित्य स्वव्यापारेषु व्यवहरंति ॥ अतश्चैतन्यं ज्ञानमात्मन एव देहेंद्रियादयस्तु जडा एवे
त्यर्थः ॥१९॥ ॥

नन्वहं जातोस्मि बाल्यकौमाराद्यवस्थामनुभवामि पश्यामीत्याद्यनवरतमनुभूयमान
स्यात्मनः कथमविकारित्वमुच्यते इत्यत्राह ॥ देहेंद्रियेति ॥ देहेंद्रियमनोबुद्धिधर्मांश्च गु
णांश्च सत्त्वादीन् कर्माणि कर्मेंद्रियव्यापारान् मिथ्यातादात्म्येन स्थिते निर्मलेऽसंगरूपे

॥ देहेंद्रियगुणान् कर्माण्यमले सच्चिदात्मनि ॥
॥ अध्यस्यंत्यविवेकेन गगने नीलतादिवत् ॥२०॥ लिमा।

सच्चिदात्मके परमात्मन्येतत्सर्वमपि अविवेकतोऽध्यस्यंति ॥ यथा गगने नीलतादिवत् ॥
अतस्ते आत्मधर्मा न भवंति ॥ अपितु देहादीनामेवेत्यर्थः ॥२०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० ननु कर्तृत्वभोक्तृत्वादिकं आत्मनि अनवरतमनुभूयमानत्वाद्दुर्वारमित्याशंक्य तदपि बोध
तथैव मिथ्येत्याह ॥ अज्ञानेति ॥ अज्ञानवशान्मानसोपाधिस्तस्यैव कर्तृत्वादयो
८ धर्मास्तत्वाज्ञानवशादात्मनि कल्प्यन्ते यथांभसश्चलनादिकं अंबुनि प्रतिफलिते
चंद्रमसि अविवेकतः कल्प्यते न तदात्मनीत्यर्थः ॥२१॥ रागेच्छासुखदुःखादीनात्म

अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि ॥ कल्प्यन्तेंबुगते चं
द्रे चलनादि यथांभसः ॥२१॥ रागेच्छासुखदुःखादि बुद्धौ सत्यां प्र
वर्तते ॥ सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः ॥२२॥ ॥

धर्मानन्यंते वैशेषिकास्तान्निराकरोति ॥ रागेति ॥ रागेच्छासुखदुःखप्रयत्नादिकं ८
सर्वं बुद्धेरेव न त्वात्मनः कुतः जाग्रत्स्वप्नयोर्बुद्धौ सत्यां प्रवर्तते सुषुप्तौ तस्याः बुद्धे
र्नाशे सति कारणे लीने न च प्रवर्तते तस्माद्बुद्धेरेव धर्मा न त्वात्मन इति ॥२२॥ ॥

तर्हि आत्मा कीदृक्स्वभाव इत्याशंक्य आत्मस्वभावं उपदिशति ॥ प्रकाश इति ॥ य
था प्रकाश एवार्कस्य स्वभावस्तोयस्य शैत्यं अग्नेरुष्णता तथात्मनोपि सच्चिदानंदनि
त्यनिर्मलस्वभावं स्वरूपमित्यर्थः ॥२३॥ ननु यद्यकारणमात्मा तर्हि ज्ञानादिप्रत्ययः क
थमित्यपेक्षायामाह ॥ आत्मन इति ॥ प्रत्यगात्मनः सच्चिदंशश्च अंश इवांशः आत्मा

प्रकाशोर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता ॥ स्वभावः सच्चिदा
नंदनित्यनिर्मलतात्मनः ॥२३॥ आत्मनः सच्चिदंशश्च बुद्धेर्वृत्ति
रिति द्वयं ॥ संयोज्य चाविवेकेन जानामीति प्रवर्तते ॥२४॥ ॥

भासः बुद्धेर्वृत्तिश्च एतद्द्वयं अविवेकेन संयोज्य ॥ संगस्यात्मनः केनापि संयोगो ना
स्त्येव तथाप्यज्ञानवशान्मेलनं संभाव्य जानामीति प्रत्ययः अहंकारवृत्तिः प्रवर्तते
केवलं प्रत्यगात्मनि किंचिद्विकारो नास्तीति भावः ॥२४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० नदेव स्पष्टयति ॥ आत्मन इति ॥ आत्मा स्वभावादेव विकारशून्यः बुद्धेः कदाचिदपि बो बो०
धत्वं केवलं नास्ति ॥ तथापि जीवः साभासाहंकारः सर्वसाभासांतःकरणवृत्तीनां एकत्र
१ तप्तायःपिंडवदेकत्र संगतमेवमत्यसमर्थत्वात् आत्मा देहेंद्रियादिकमहमिति विचार्य अ
हं कर्त्ता अहं द्रष्टेति मुह्यति भ्रांतो भवतीत्यर्थः ॥ २५ ॥ आत्मा स्वयमेव स्वस्मिन्न विवेके

आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति ॥ जीवः सर्वमलं
ज्ञात्वा कर्ता द्रष्टेति मुह्यति ॥ २५ ॥ रज्जुसर्पवदात्मानं जीवो ज्ञात्वा भयं
वहेत् ॥ नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत् ॥ २६ ॥ ॥

नान्यधर्मानारोप्य बिभेतीत्याह ॥ रज्जुसर्पवदिति ॥ यथा अंधकारादौ विकाररहितरज्ज्वादौ सर्पाध्यारोपणं कृत्वा भयं कंपादिकं वहेत् ॥ एवमात्मापि स्वस्मिन् जी
वत्वमारोप्य सद्वितीयपरिच्छिन्नं ज्ञात्वा भयदुःखसागरे मग्नो भवति ॥ यदा शास्त्राचार्य १
प्रसादेन शास्त्रार्थज्ञानमुत्पन्नं भवति ॥ तदा विवेकचक्षुषा स्वात्मानं अखंडानंदं ज्ञात्वा नैकरूपं
संपश्यन् ॥ ततो नाहं जीवः परमात्माहमिति ज्ञात्वा भयदुःखादिरहितः सुखी भवेत् ॥ २६ ॥ ॥

नन्वात्मत्वं तत्सामीप्ये के बुद्धिमनोहंकारादिभिः कथं नावलोक्यते न ज्ञायते तत्राह ॥ आत्मे
ति ॥ आत्मा केवल एक एव सन्नपि बुद्धिमनोहंकारादीन् अवभासयति ॥ तैर्जडैर्मन आदिभि
र्नावभास्यते ॥ यथा एक एव दीपो घटादीन् सर्वानपि प्रकाशयति ॥ प्रकाशितैर्घटादिभि

आत्मावभासयत्येको बुद्ध्यादीनींद्रियाणि हि ॥ दीपो घटादिवत्स्वा
त्मा जडैस्तैर्नावभास्यते ॥ २७ ॥ स्वबोधे नान्यबोधेच्छा बोधरूपतया
त्मनः ॥ न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने ॥ २८ ॥ ॥

र्नावभास्यते तद्वदित्यर्थः ॥ २७ ॥ ननु आत्मा बुध्यहंकारादिभिर्नावभास्यते यदि तर्हि आ
त्मज्ञाने ज्ञानांतरेण भवितव्यमित्याशंक्य नेत्याह ॥ स्वबोध इति ॥ आत्मनो बोधरूपत्वात्
स्वबोधे निश्चये सति तस्यात्मनो बोधाय ज्ञानांतरापेक्षा नास्त्येव अनुभवस्वरूपत्वात् ॥ यथा
दीपस्यैव प्रकाशने दीपांतरापेक्षा नास्ति तद्वदित्यर्थः ॥ २८ ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० यदि बुध्यादिभिरात्मा ज्ञेयो न भवेत्तर्हि आत्मज्ञाने उपायांतरं वक्तव्यं स उपायः कइत्य बो०
त आह॥ निषिध्येति॥ अथात आदेशो नेति नेतीति निरसन वेदवाक्यैर्निखिलोपा
१०

निषिध्य निखिलोपाधीन्नेति नेतीति वा
क्यतः॥ विद्यादैक्यं महावाक्यैर्जीवात्म
परमात्मनोः॥ २९॥ ॥ ॥

धीन्निषिध्यात्मानं ज्ञात्वा तत्त्वमसि अयमात्मा ब्रह्म तत्त्वघोऽहमित्यादिवाक्यैर्लक्षणया ब्रह्मा १०
त्मैक्यज्ञानं विद्यात्प्राप्नुयात्॥ अनेन प्रकारेण ज्ञातव्यमित्यर्थः॥ २९॥ ॥ ॥

अतन्निरसनाभावे आत्मा ज्ञातुं अशक्यः यथा नायं सर्प इति आरोपितस्यापकरणा
भावे रज्जुज्ञानं नोत्पद्यते नहृदनात्मनिरसनाभावे नात्मज्ञानं इत्यस्याशये नाह॥ आवि
द्यकमिति॥ देहेंद्रियादिकं सर्वं दृश्यजातं आविद्यकं दृश्यत्वात्॥ बुद्बुदवत् क्षरं नश्वरं एत
द्विलक्षणं निर्मलं निरूपाधिकं नित्यमेकं सच्चिदानंदात्मकं ब्रह्मैवाहमस्मीति विद्यात् ततः॥

॥ ॥ ॥ आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरं॥ एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलं॥
॥ ॥ ३०॥ देहान्यत्वान्न मे जन्म जराकार्श्यलयादयः॥ शब्दादिविषयैः संगो निरिंद्रियतया न च
॥ ३१॥ ॥

तद्रूपो भवतीत्यर्थः॥ ३०॥ एवमुक्तरीत्या आत्मनः अद्वयानंदं वाक्यार्थज्ञानेनापरोक्षतयो ज्ञा
त्वा स्वानुभवावष्टंभेन तत्त्वात्मन्येवात्मज्ञानमननप्रकारमाह॥ पंचभिः श्लोकैः॥ देहेति॥ देहा
न्यत्वादिभिः जडदृश्यत्वादिस्वभावस्थूलशरीरादन्यत्वात् मे जराकार्श्यलयादयो न संति इं
द्रियादिभिरसंगत्वान्मे शब्दादिविषयभोगैः संगो नुभवो नास्त्येव॥ ३१॥ ॥

11

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ०

११ अमन इति॥ अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥ एतस्माज्जायते प्राणो मनः सर्वे बे
न्द्रियाणि च॥ खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी॥३२॥ कथमिंद्रियप्राणमनसां भा
सकते त्याशंक्य श्रुतिं प्रमाणयति॥ अप्राण इति॥ स्पष्टार्थः॥३३॥ गुरुप्रसादात्स्वानुभव

अमनस्त्वान्न मे दुःखरागद्वेषभयादयः॥ अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिशा
सनात्॥३२॥ अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥ एतस्माज्जायते प्राणो
मनः सर्वेंद्रियाणि च॥३३॥ निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरंजनः॥ नि
र्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः॥३४॥ ॥ ॥

सिद्धमर्थं चाभिनयति निर्गुण इत्यादिभिस्त्रिभिः श्लोकैः॥ निर्गुणेति॥ अहं निर्गुणः बुध्या
द्यभावान्निष्क्रियः क्रियाद्यभावान्नित्यः अपक्षयाभावान्निर्विकल्पः संकल्पाभावान्नि ११
रंजनः असंगत्वान्निर्विकारः षोडशकलात्मकलिंगदेहशून्यत्वान्निराकारः निरवयव
त्वान्नित्यमुक्तः बंधनाभावान्निर्मलः अविद्यातत्कार्यरहितत्वात्॥३४॥ ॥ ॥

ननु पूर्वोक्तैर्हेतुभिः एवं विशिष्टं स्वरूपमस्ताशिषमित्युक्ते तत्किं विशिष्टमित्याशंक्याह॥ अ
हमिति॥ अहमाकाशवत्सर्वस्य दृश्यजातस्य बहिरंतर्गतः अच्युतः च्युतिरहितः सदा सर्वेस
मः विषमेष्वपि समः व्याप्य स्थितः तथा विशुद्धः निर्लेपः अचलः पूर्णस्य चलनाभावात्

अहमाकाशवत्सर्वं बहिरंतर्गतोऽच्युतः॥ सदा सर्वसमः शु
द्धो निःसंगो निर्मलोऽचलः॥३५॥ नित्यशुद्धविमुक्तैकमखंडा
नंदमद्वयं॥ सत्यं ज्ञानमनंतं यत्परं ब्रह्माहमेव तत्॥३६॥ ॥

॥३५॥ नित्यमिति॥ एकमखंडानंदं द्वितीयाभावादद्वयं सत्यं ज्ञानमनंतं यत्परं ब्रह्मेति श्रु
त्या प्रतिपाद्यते तत्परं ब्रह्मैवाहमस्मीति स्वरूपं तत्त्वं कथितं॥३६॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० पूर्वश्लोकोक्तमननं चिरकालाभ्यस्तं तत्पुरुषार्थं साधयतीत्याह ॥ एवमुक्तप्रकारेण ब्रह्मै बो०
वाहमस्मीति निरंतर्येण चिरकालाभ्यस्ता वासना अविद्याकृतचित्तविक्षेपान् निःशेषतो
नाशयति यथा औषधं चिरकालसेवितं सत् रोगं निःशेषतो नाशयति तद्वदित्यर्थः ॥३७

१२

एवं निरंतरं कृत्वा ब्रह्मैवास्मीति वासना ॥ हरत्यविद्याविक्षे
पान् रोगानिवरसायनं ॥३७॥ विविक्तदेश आसीनो विरागो
विजितेंद्रियः ॥ भावयेदेकमात्मानं तमनंतमनन्यधीः ॥३८॥

ब्रह्मानुसंधाने साधननियममाह ॥ विविक्तेति ॥ विविक्तदेशे जनसंबंधवर्जिते देशे
आसीनः सुखोपविष्टः विरागः सर्वत्रागताभिलाषः ॥ अतएव विजितेंद्रियः विनिर्जि १२
तानि इंद्रियाणि येन सः ॥ अनंतमपरिछिन्नमद्वयमेकं तमात्मानमनन्यधीः ब्रह्मण्ये ॥
व स्थिता निश्चयात्मिका बुद्धिर्यस्य तादृशो भावयेत् ध्यायेत् ॥३८॥

सर्वदृश्यप्रपंचे जाग्रति कथमेकत्वभावनासंभवः इत्यत आह ॥ आत्मन्येवेति ॥
अखिलं दृश्यजातं सुधीः शुद्धांतःकरणः तत्शुद्धया धिया आत्मन्येव समाधिसम
ये प्रविलाप्य प्रकर्षेण नाशयित्वा नरः द्वितीयाभावादेकमात्मानं सदाज्योत्स्नाकारावत्

आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः ॥ भावयेदेकमात्मानं
निर्मलाकाशवत्सदा ॥३९॥ नामरूपादिकं सर्वं विहाय परमार्थवि
त् ॥ परिपूर्णचिदानंदस्वरूपेणावतिष्ठते ॥४०॥ ॥

भावयन्नवतिष्ठेदिति ॥३९॥ परमार्थदर्शी मुनिः नामरूपवर्णादिकं सर्वं विहाय परि
पूर्णज्ञानानंदस्वरूपेणैवावतिष्ठेत् इत्याह ॥ नामरूपेति ॥ श्लोकः ॥ स्पष्टार्थः ॥४०॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ॰ ननु प्रमात्रादित्रिपुटी ज्ञानं वर्त्तमानमुपलभ्यते कथमेकत्वभावनेत्याशंक्य परमात्म बो॰
१३ नि भेदो नास्तीत्याह ॥ ज्ञातृज्ञानेति ॥ ज्ञातृज्ञानज्ञेयभेदः परमात्मनि न विद्यते स भेदः क
ल्पित आत्मन्येव भाति ज्ञानानंदैकरूपत्वात् आत्मा स्वयमेव दीप्यति प्रकाशते ॥४१॥

ज्ञातृज्ञानज्ञेयभेदः परे नात्मनि विद्यते ॥ परानंदैकरूपत्वाद्दीप्यति स्वयमेव तत् ॥४१॥
एवमात्मारणौ ध्यानमथने सततं कृते ॥ उदितावगतिर्ज्वाला सर्वाज्ञानेंधनं दहेत् ॥४२॥

एवं विशुद्धवस्तुध्यातुः प्रत्यक्षफलमाह ॥ एवमिति ॥ आत्मा अरणिः आत्मांतःकरणमेवारणिः ॥ तस्मि
न्मन एवोत्तरारणिः ॥ ध्यानेन तयोर्मथने सर्वदा कृते तत्रोदिता ज्वालारूपावगतिः ज्ञानं विद्या अ
ज्ञानमेवेंधनं मत्वा ज्ञानं निःशेषतः सपरिवारं नाशयति तदा मुमुक्षुः स्वाराज्येभिषिक्तः कृतकृ १३
त्यो भवतीत्यर्थः ॥४२॥ ॥

जीवपरमात्मनोरत्यंतरैक्यज्ञानेनाविद्यापरिकल्पितांधतमसि निःशेषमपयाते सति परमा
त्मा स्वयमेवाविर्भवेदित्याह ॥ अरुणेति ॥ अरुण इत्यरुणप्रकाशेन आशावंधकारक्षयें अंशुमा
न् यथाविर्भवेत् तद्वदात्मापीत्यर्थः ॥४२॥ आत्मा सर्वदा परोक्षस्वभावत्वात् अप्राप्त एव स

अरुणेनेव बोधेन पूर्वं संतमसे हृते ॥ तत आविर्भवेदात्मा स्वयमेवां
शुमानिव ॥४३॥ आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया ॥ तन्ना
शे प्राप्तवद्भाति स्वकंठाभरणं यथा ॥४४॥ ॥ ॥

आत्मा कदा प्राप्तो भवेदिति शिष्याभिप्रायेणाह ॥ आत्मा त्विति ॥ आत्मा सर्वत्र पूर्णः अद्वयानं
दस्वरूपः सर्वदा प्राप्त एव अविद्यावशात् ह्रंसा अप्राप्त एवाभाति तन्नाशेन दशावरणाविद्यानाशेवा
क्यश्रवणात्प्राप्त एव भवति ॥ कंठगतत्वामीकरन्यायादित्यर्थः ॥४४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० नतु जीवस्य परमात्मन्येकत्वमयुक्तमित्याशंक्याह ॥ स्थाणाविति ॥ अंधकारे स्थिते स्थाणौ पुरुषोयमि बो०
ति चौरशंकया निर्भेति ॥ तथैवाविचाराद्ब्रह्मणि जीवत्वमारोप्यते तथा रागस्थोपदेशाज्ज्ञानि न विवेक
१५ दृष्ट्या तस्य जीवस्य तात्त्विके रूपे लक्ष्येन त्वंपदार्थे दृष्टे सति अज्ञानकल्पितत्वाज्जीवत्वमपि निवर्त

स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीवता ॥ जीवस्य तात्त्विके रूपे तस्मिन्
दृष्टे निवर्त्तते ॥ ४५ ॥ तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा ॥ अहं मम
ति चाज्ञानं बाधते दिग्भ्रमादिवम् ॥ ४६ ॥ ॥ ॥

ते ॥ ब्रह्मैवाहमिति जानातीत्यर्थः ॥ ४५ ॥ अहं ममेति प्रत्यये जायति कथं नाहमितिप्रत्यय उत्साशं
क्यानदर्पितथैवमपेक्षाह ॥ तत्त्वेति ॥ जीवपरयोरेकत्वानुसन्नं यज्ज्ञानं न तदहं ममेति अज्ञानं बाध १५
ते दिग्भ्रमादिवदिति भानुदर्शनादित्यर्थः ॥ ४६ ॥ ॥

अहं ममेति प्रत्ययेन ष्टे योगी सम्यक् विवेकता नवान् सन् विज्ञानेन चक्षुषा सर्वं दृश्यं प्र
पंचं स्वात्मन्येवानुभवेन पश्यतीत्याह ॥ सम्यगिति ॥ एकमात्मानं सर्वं पश्यति कृतकृत्यो
भवतीति भावः ॥ ४७ ॥ नन्वात्मानं सर्वं पश्यतीति प्रत्यक्षविरोधात् नानात्वेन दृश्यमानमि
दं सकथमात्मन्यभेदेन पश्यतीत्यत आह ॥ आत्मैवेदमिति ॥ इदं सर्वं जगदात्मैवात्मका

सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितं ॥ एकं च सर्वमा
त्मानमीक्षते ज्ञानचक्षुषा ॥ ४७ ॥ आत्मैवेदं जगत्सर्वमात्मनोन्यन्न
किंचन ॥ मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्षते ॥ ४८ ॥ ॥

र्यत्वात् ॥ अर्थतोन्यदात्मनो न किंचिद्दृश्यते ॥ यथा घटशरावादिकं मृत्कार्यं मृदो स्वन्नास्ति
अतः स्वात्मन्येव सर्वं दृश्यजातमभेदेन निरीक्ष्यते पश्यति ॥ वाचारंभणं विकारो नामधेयम्
तिकेत्यचससमिति श्रुतेः ॥ ४८ ॥ ॥

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ॰
१५

एवं भक्तावस्थेषाजीवन्मुक्तिरित्याह॥ जीवन्मुक्त इति॥ अनाद्यविद्यापरिकल्पितपूर्वोपाधिदेह
मनोबुध्यादीन्गुणान् सत्वादीनूपरित्यजेदिति॥ इयमेवजीवन्मुक्तिरित्युच्यते॥ तच्चिदानंदरू
दिगुणत्वाद्भ्रमरकीटवत्साक्षाद्ब्रह्मभवेत् प्राप्नोतीत्यर्थः॥४९॥ तत्वतस्तु आत्मारामः सुखंति

जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत्॥ सच्चिदानंदरूपत्वाद्भवेद्भ्रम
रकीटवत्॥४९॥ तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान्॥ योगी शांतिसमा
युक्त आत्मारामो विराजते॥५०॥ ॥

तीर्त्वा॥ तीर्त्वेति॥ मोह एवार्णवः अपार्यत्वात्॥ तं ज्ञानप्लवेन तीर्त्वा निःशेषं नाशयित्वा राग
द्वेषादय एव राक्षसाः मोक्षपरिपंथित्वात्तान्निःशेषतो नाशयित्वा शांतिसमायुक्तः शमदमादि
सहितः॥ आत्मारामः आत्मन्येव आरामः क्रीडायस्य स विराजते स्वाराज्येनाभिषिक्तः प्रकाशते १५
अर्थांतरं ध्वन्यते॥ श्रीरामाख्योरामः समुद्रं तीर्त्वा रावणादीन्राक्षसान् हत्वातीनेच शांतिस्तुया
सीतयातमेतः विराजते अयोध्यायां॥५०॥ ॥ ॥

जीवन्मुक्तस्य लक्षणमाह॥ बाह्यानित्येति॥ बाह्येंद्रियविषयोद्भवानित्यसुखासक्तिं प्रीतिवा
सनां हित्वा तत्र हेतुः आत्मसुखेन निर्वृतः घटस्थदीपवदंतरेव प्रकाशते स्वसाक्षिकमेवात्मानुभ
वसुखमितरैर्न ज्ञायत इत्यर्थः॥५१॥ एवमुक्तप्रकारेण जीवन्मुक्तः सन् अप्रारब्धस्तंक्षयाद्देवनि
वर्तितव्यमित्याह॥ उपाधिस्थ इति॥ देहोपाधौ साक्षित्वेन स्थितोपि मुनिर्व्योमवत्तद्धर्मैर्नानुलि

बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः॥ घटस्थदीपवत्स्वच्छं अंतरेव प्रकाशते॥५१
उपाधिस्थोपि तद्धर्मैर्न लिप्तो व्योमवन्मुनिः॥ सर्ववित्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत्॥५२
उपाधिविलये विष्णौ निर्विशेषं विशेन्मुनिः॥ जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा॥५३

प्तः॥ मम कर्मलेपो नास्तीति भावयेत्॥ सर्वज्ञोपि मूढवल्लाहृतवत्तिष्ठेत् सर्वत्र विषयेषु यदृच्छ
याप्राप्तेष्वनासक्तो आसक्तिरहितः सन् वायुवच्चरेत् निनयेत्॥५२॥ प्रारब्धकर्मक्षये देहोपा
धौ लीने विदेहकैवल्यमाह॥ उपाधिविलयादिति॥ उपाधिभूते देहद्वयविलये प्रारब्धकर्म
संक्षये मुनिर्योगी विष्णौ सर्वत्र व्यापके परे ब्रह्मणि निर्विशेषं यथा भवति तथा विशेत्॥ अंसैने

मिदृष्टांतः जलेजलमित्यादि॥५३॥

बो॰

18

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ॰ ब्रह्मणः सर्वाधिष्ठानत्वात् सर्वातिशयत्वात् तटस्थलक्षणेनाभिधत्ते श्लोकद्वयेन॥ यल्लाभादिति बो॰
१६ यद्ब्रह्मसाक्षात्कारलाभादपरो लाभो न विद्यते॥ सर्वलाभानां तत्रैवान्तर्भूतत्वात्॥ यथा ब्रह्मानं
देक्षुद्रानंदानामन्तर्भावः॥ यत्सुखात् ब्रह्मानुभवसुखादपरं सुखं नास्ति निरतिशयत्वात्॥ यत्
ज्ञानाद्ब्रह्मसाक्षात्कारज्ञानादपरं ज्ञानं नास्ति मोक्षहेतुत्वात्॥ तत् ब्रह्मेति जानीयात्॥५४॥ ॥

यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखं॥ यत्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्य
वधारयेत्॥५४॥ यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः॥ यज्ज्ञात्वा नापरं ज्ञेयं त
द्ब्रह्मेत्यवधारयेत्॥५५॥ तिर्यगूर्ध्वमधः पूर्णं सच्चिदानंदमद्वयं॥ अनंतं नित्य
मेकं यत्तद्ब्रह्मेत्यवधारयेत्॥५६॥ ॥

यद्दृष्ट्वेति॥ यद्दृष्ट्वा परमन्यत् द्रष्टव्यं नास्ति तेनैव पुरुषार्थस्य समर्थितत्वात्॥ यद्भूत्वा येनैकं गत्वा
पुनर्भवो जन्मादिकं नास्ति॥ यत्स्वरूपं ज्ञात्वा अन्यज्ज्ञेयं नास्ति॥ तदेव ब्रह्मेत्यवधारयेत्॥ अ १६
न्यत्सर्वं वृथापांडित्यमित्यर्थः॥५५॥ तिर्यगूर्ध्वमधः सर्वत्र ब्रह्मैव पूर्णमित्याह॥ तिर्यगिति॥
तिर्यगूर्ध्वमधइति स्पष्टार्थः॥५६॥

अखंडानंदमेकं ब्रह्म वेदांतैरतद्व्यावृत्तिरूपैः अतन्निरसनेन ज्ञातव्यमित्याह॥ अतद्व्यावृत्ति
रिति॥ अतद्व्यावृत्तिरूपेणेति स्पष्टार्थः॥ अखंडानंदेति॥ शरीरेंद्रियाद्यभिमानं त्यक्त्वा ब्रह्मैवा
हमस्मीति भावयेत्॥५७॥ ननु ब्रह्मादयोपि अतिशयानंदिनं दृश्यंते तत्राह॥ अखंडा

अतद्व्यावृत्तिरूपेण वेदांतैर्लक्ष्यतेऽद्वयं॥ अखंडानंदमेकं यत्तद्ब्रह्मे
त्यवधारयेत्॥५७॥ अखंडानंदरूपस्य तस्यानंदलवाश्रिताः॥
ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनो लवाः॥५८॥ ॥

नंदरूपस्येति॥ ब्रह्मेंद्रादयः परिच्छिन्नानंदिनः ब्रह्म तु अखंडानंदानुभवरूपत्वात् अप
रिच्छिन्नं आनंदमेव स्वरूपं यस्य तस्यानंदसमुद्रस्यानंदलेशमाश्रित्य ब्रह्मेंद्रादयोप्यानं
दिनो भवंति॥ आनंदतारतम्येन॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति
श्रुतेः॥५८॥ ॥

(17)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० परमप्रेमास्पदतयात्मैव भातीत्युच्यते एतदयुक्तं अनात्मापि देहादिकं प्रपंचं प्रिय बो०
तरं अनुभूयतइत्याशंक्याह॥ तद्युक्तमिति॥ अखिलं देहाद्यनात्मवस्त्वपि तद्यु
१७ क्तेनात्मनासंयुक्तमेव प्रियतमं लोके कोपि व्यवहारस्तद्युक्तरूप एव प्रियतर
स्तस्मात्सर्वगतं ब्रह्मात्यंतप्रियं यथाक्षीरं सर्वं व्याप्य घृतमिवास्त्वपि ब्रह्मव्याप्तत्वा

तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः॥ तस्मात्सर्वगतं
ब्रह्म क्षीरे सर्पिरिवाखिले॥५९॥ अनण्वस्थूलमह्रस्वम
दीर्घमजमव्ययं॥ अगुणं गुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत्॥६०

त्प्रियमेवाभाति॥ अतः आत्मैव प्रियतम इति सिद्धं॥५९॥ तर्हि आत्मा केनप्रकारे १७
ण सर्वं व्याप्य तिष्ठतीति जानीयादित्याशंक्य साक्षाद्नुभवाशक्यत्वात्॥ अतएव
स्थूलमिति श्रुतेः सत्तारूपेण भातीत्याह॥ अनण्विति॥ अनण्वस्थूलमिति स्पष्टार्थः॥६०

पुनस्तद्ब्रह्मज्ञानार्थं श्लोकत्रयेण पृथक्पृथक् निरूपयति॥ यदिति॥ यद्वस्तु स्वभा
सा न भासयेत्तत्तु भास्यैरर्कादिभिः न भास्यते॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा वि
द्युतो भांति कुतोयमग्निः॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति

यद्भासा भास्यतेऽर्कादि भास्यैर्यत्तु न भास्यते॥ येन सर्वमिदं भा
ति तद्ब्रह्मेत्यवधारयेत्॥६१॥ स्वयमंतर्गतं व्याप्य भासयन्नखिलं
जगत्॥ ब्रह्म प्रकाशते वह्निः प्रतप्तायसपिंडवत्॥६२॥ ॥

श्रुतेः॥ येन सर्वमिदं भूतभौतिकं भावरूपं जगद्भाति तद्ब्रह्मेति जानीयात्॥६१॥
तप्तायः पिंडवत्स्वयमेवांतर्बहिर्व्याप्य भासयन्नखिलं ब्रह्म प्रकाशत इत्याह॥
स्वयमिति॥ स्वयमंतर्गतमिति स्पष्टार्थः॥६२॥ ॥ ॥ ॥

18

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ०गी० पुनस्तदेवाह॥ जगद्विलक्षणमिति सर्वं ब्रह्मैव नतत्सं तथापि जगद्रूपेण यद्दापश्य बो०
ति तदा नगृह्यत इत्यत आह॥ जगदिति॥ जगद्वैलक्षण्येन तत्कार्यत्वेन विचार्यते चे
त् ज्ञातुं शक्यं ब्रह्मणोन्यन्न विद्यते॥ यदि ततोन्यद्दृश्यते यत्किंचित्तन्मृषैव मरुमरीचि

जगद्विलक्षणं ब्रह्म ब्रह्मणोन्यन्न किंचन॥ ब्रह्मान्यद्भाति चेन्मिथ्या
यथा मरुमरीचिका॥ ६३॥ दृश्यते श्रूयते यद्यत् ब्रह्मणोन्यन्न किं
चन॥ तत्वज्ञानाच्च तद्ब्रह्म सच्चिदानंदमद्वयं॥ ६४॥ ॥

काजलवदित्यर्थः॥ ६३॥ पुनस्तदेव स्फुटं निरूपयति॥ दृश्यते इति॥ चक्षुषा यद्दृश्यते
श्रोत्रेण यत् श्रूयते यन्मनसा स्मर्यते यच्च वाचाभिधीयते॥ तत्वज्ञानात्सर्वं ब्रह्म स १८
च्चिदानंदमद्वयं ब्रह्मणोऽन्यन्न किंचिदस्तीत्यर्थः॥ ६४॥ ॥ ॥

सर्वगमिति॥ ॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ज्ञानप्र
सादेन विशुद्धसत्वः ततस्तं पश्यति॥ निष्कलं ध्यायमान इत्यादि॥ यदि सर्वगतं ब्रह्म
तर्हि सर्वैः किं न दृश्यत इत्याशंक्य चक्षुरादिभिर्न गृह्यत इत्येतच्छ्रुत्या प्रतिपादयति॥

सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते॥
अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत्॥ ६५

नचक्षुषेति॥ न चक्षुषा पश्यति कश्चनैनं हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुर
मृतास्ते भवंतीति॥ अज्ञानचक्षुः सर्वगतमपि सच्चिदानंदं ब्रह्म न पश्यति॥ यथा
प्रकाशमानमपि भानुमंधो न पश्यति ज्ञानप्रसादेन ज्ञानचक्षुषा शुद्धसत्वो निष्कला
विद्यः सर्वदा सर्वत्र ब्रह्मैव पश्यतीत्यर्थः॥ ६५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० एवमुक्तरीत्यानुभवसंपन्नस्यापि तदभ्यासरहितस्य वासनावशात् किंचिदज्ञानं संभव बो०
तीति तत्परिहारार्थं पुनः स्मरणादि कुर्यादित्याह ॥ स्मरणादिभिरिति ॥ जीवः प्रत्यगात्मा एत
१९ त्संस्करणार्थस्य स्मरणमननादिभिः उच्चैः दीप्तः प्रकाशितः ज्ञानमेवाग्निस्तेन परितापि
तो भाति शोधित इत्यर्थः ॥ सर्वसंसारमूलभूताज्ञानमलान्मुक्तः स्वयमेव सम्यक्प्रकाश

स्मरणादिभिरुद्दीप्तो ज्ञानाग्निपरितापितः ॥ जीवः सर्वमलान्मुक्तः ।
स्वर्णवद्द्योतते स्वयं ॥६६॥ हृदाकाशोदितो ह्यात्मा बोधभानुस्तमो
पहृत् ॥ सर्वव्यापी सर्वधारी येन सर्वं प्रकाश्यते ॥६७॥ ॥

ते ॥ यथाग्निना परितापितं स्वर्णं औपाधिकं दुर्वर्णादिकं हित्वा स्वस्वरूपेण प्रकाशते तद्वदि १९
त्यर्थः ॥ ६६ ॥ एवं शोधितो जीवः परमात्मा हृदयाकाशे उदितः सन् तमः अज्ञानमुपसंहरन्
भानुवत्सर्वं स्वरूपप्रकाश इत्याह ॥ हृदिति ॥ बोध एव भानुः सर्वस्याधारभूतत्वात्सर्वव्यापी
सर्वधारी वशेषं स्पष्टं ॥६७॥

ननु आत्मज्ञस्यापि ज्ञानप्रतिबंधकदुरितपरिहारार्थं प्रयागादितीर्थयात्रोपयोगः कर्त्त
व्य इत्याशंक्य आत्मतीर्थे स्नातस्य न किंचित्कर्तव्यमित्याह ॥ दिग्देशेति ॥ यो विनिष्क्रियः
परमहंसः स्वात्मतीर्थं भजते स सर्ववित् सर्वज्ञः सर्वत्र परमात्मस्वरूपत्वात् अमृतः मु

दिग्देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरंजनं ॥ यः स्वात्मतीर्थं भज
ते विनिष्क्रियः स सर्ववित्सर्वगतोऽमृतो भवेत् ॥६८॥ ॥ ॥

क्तो भवेत् ॥ कथंभूतं स्वात्मतीर्थं दिग्देशकालादेरनपेक्षमेव सर्वगं शीतादिद्वंद्वदुःखा
नि हरतीति शीतादिहृत् नित्यसुखं मोक्षानंदप्रापकत्वात् इतरतीर्थं पुनः विपरीतं द्रष्टव्यं ॥ तस्मा
दात्मतीर्थे स्नातस्य न किंचिदवशिष्यत इति भावः ॥६८॥ ॥ इति श्रीमत्परमहंसपरिव्राज
काचार्यगोविंदभगवत्पूज्यपादशिष्यश्रीमच्छंकराचार्यविरचितात्मबोधप्रकरणं
सटीकं संपूर्णं ॥ ॥ श्रीपरमेश्वरार्पणमस्तु ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०

आत्मबोधप्रकरणसमाप्त

२०

KKSU LIBRARY
RAMTEK
441 106
M1096.
Dist Nagpur

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.10.20 11:52
,TRANSFERRED=2020/10/26 at 11:55:28
,PAGES=21
,TYPE=STD
,NAME=S0004542
,Book Name=M-1096-ATAMBODH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection